क्र.नं. ९०

व्याकरण

१६१६

व्या ३०

# राघवेन्द्राचार्य – त्रिपथगा

राजवाडे संशोधन मंदिर
क्रमांक 10
हस्तलिखित ग्रंथ संग्रह.
"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

# ॥अथपरिभाषेन्दुशेखरव्याख्यात्रिपथगाप्रारभ्यते॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."
राजवाडे संशोधन मंदिर

(2)

त्रि० ॥ श्रीगणेशाय नमः ॥ ॥पुरांतकस्कराधिपप्रमुखसेवितं दैवतं पुरातनगिरास्तुतं कमलयासमालिंगितं ॥ चराचरविधायित
गा० त्रमणिपनीपताम्यादरादुरःसरधराधरमवरनीलधाराधरं ॥ १ ॥ श्रीवेंकटेशं पितरं सर्वतंत्रविशारदं ॥ सावित्रीं मातरं नौमि गुरून्
१ विद्यामदांस्तथा ॥ २ ॥ वितन्यते त्रिपथगा विष्णुपादाब्जसंगिनी ॥ सागरस्य प्रियाचेंदुशेखरांकविहारिणी ॥ ३ ॥ मारीप्सितग्रंथ
समाप्तिमचयादिप्रतिबंधकदुरितोपशमाय कृतं मंगलं शिष्यशिक्षायै निबध्नाति ॥ नत्वेति ॥ नागेश इति ॥ ननु आत्मनामेति नि
षेधादयुक्तमिदमिति चेदत्र केचित् ॥ आत्मनामेति निषेधो व्यावहारिकनाममात्रविषयः ॥ इदं तु यौगिकं नाम ॥ अत एव भगवान्
पतंजलिरपि गोनर्दीय आहेति तत्र तत्र यौगिकं नाम जग्राहेति ॥ तन्न नामांतरेणाव्यवहारात् व्यवहारेप्येतन्नाम्न एव प्रसिद्धेश्च
अभिवादनादौ व्यावहारिकनामोत्कीर्तनं न दोषायेति तत्त्वं ॥ कूपखानकन्यायेन समाधानं केचिदाहुः ॥ स्फुधीरिति ॥ इदं स्वस्य ग्रं
थकरणशक्त्याद्याविष्करणाय सुखमनायासः ॥ आयासेन भाष्यादितोपि बोधसंभवात् ॥ प्राचीनेति ॥ पाणिनेः ॥ ज्ञापकन्याय
सिद्धानीति पृथक्कोटिः ॥ अनेन परिभाषासूत्रव्युदासः ॥ केचित्तु प्राचीनेत्याद्येवैव कोटिः ॥ ज्ञापकन्यायेत्यत्र प्रायेणेति शेषः ॥ ते
न वाचनिकानां संग्रह इत्याहुः ॥ भाष्येति ॥ इदं द्वयोर्विशेषणं ॥ अनेन स्तिपा शपेत्यादिव्युदासः ॥ प्राचीनवैयाकरणतंत्रे वाचनिक ए०
त्वेन पाणिनीयतंत्रे ज्ञापकन्यायसिद्धत्वेन भाष्यवार्तिकयोर्निबद्धानीत्यर्थः ॥ परिभाषेति ॥ परितो व्याप्तां भाषां परिभाषां प्रचक्ष १
ते ॥ लिंगवत्त्वे सति फलवत्त्वं परिभाषात्वमिति केचित् संज्ञाशास्त्रान्यत्वे सति विध्यपेक्षितार्थविधायकत्वं तत्त्वं ॥ संज्ञा च परिभाषा चे
त्यभियुक्तोक्तावतिदेशस्य पृथगुपादानं गोबलीवर्दन्यायेनेति परे ॥ व्याख्यानत इति ॥ पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ॥

(2A)

आक्षेपोथसमाधानंव्याख्यानंषड्विधंमतं॥एकवाक्यतयैवनियमइति॥यथोद्देशपक्षेइतिशेषः॥नतुउभयत्राप्येकवाक्यता
याअविशेषेकोऽनयोर्भेदः॥नचस्वदेशेएकवाक्यताएकत्रपरत्रचविधिदेशेइतिभेदः॥फलभेदाभावेएतस्याकिंचित्करत्वात्तइ
स्यतःफलभेदमाह॥त्रिपाद्यामपीति॥त्रैपादिकेनविधिनास्वसंस्कारायपरिभाषोपस्थापनात्॥अदृश्यपिशाचेनआकर्षण
दर्शनात्॥पक्षद्वयसाधारणमिति॥अविशेषेणप्रवृत्तेरितिभावः॥प्रदेशैकवाक्यतायाइति॥सर्वशास्त्राभिज्वलनंचएकवाक्यत
यासंस्कारकत्वमितिभावः॥इदंचिंत्यं॥संस्कारमात्रस्यैवज्वलनशब्दार्थत्वेबाधकाभावेनैकवाक्यतयेतिनिवेशेमानाभावात् स्व
देशगृहीतवाक्यार्थबोधस्यतत्रविधौस्मृतिमात्रेणतत्तत्संस्कारामिप्रायेणैवएकदेशस्थइत्युक्तेरुपपत्तेश्च॥एकवाक्यतयासंस्का
रकत्वेहि अधिकारस्यापितथात्वेनततोविशेषाभिधित्सयातशोक्त्यसंगतिः॥प्रदीपदृष्टांतस्तुएवमेतत्त्वबुद्धिजननद्वा
रेसंतेनग्रंथेन एकवाक्यतामंतरात्वयैवयोजितः॥स्वबुद्धिजननद्वारेतित्वदुपपादनंचएकवाक्यतायांनानुकूलं॥कार्यकाल
पक्षेतवाप्येवमेववक्तव्यत्वात्॥नहितवापिकार्यकालपक्षेपरिभाषाणांस्वदेशेवाक्यार्थाभावः॥बाधकाभावात्॥संज्ञाशा
स्त्रस्यत्विति वक्ष्यमाणविशेषोक्त्ययोगाच्च॥नहिस्वबुद्धिरेकवाक्यतयाबोधः॥किंतुस्मृतिमात्रं॥संस्कार्यविधीनामनेकत्वे
नयुगपच्छ्रोतबुध्यनारोहेणतावतामुपस्थानासंभवाच्च॥प्रधानेनगुणाकर्षणेपिगुणेनप्रधानाकर्षणस्यायुक्तत्वाच्च॥नहिप्र
याजादिवाक्यैःपूर्णमासादिवाक्यमाकृष्यते॥क्विंतिचेतिसूत्रस्यकैय्यटस्तुएकदेशिपक्षाशयवर्णनायप्रवृत्तः॥इतएवारु
च्याभाष्ये ऽप्यवेति पक्षांतरमुपन्यस्तं तत्पक्षेतु विधिप्रदेशेएकवाक्यतासंज्ञाशास्त्रस्यत्विति वक्ष्यमाणविशेषोक्त्याकार्य॰

(3)

त्रि॰ कालपक्षेपरिभाषाणांस्वदेशेवाक्यार्थबोधकत्वस्यत्वदभिमतत्वसिद्धेः॥ननुप्रसिद्धत्वस्योभयत्राविशेषेकार्यकालपक्षेएवत्रि
गा॰ पाद्यामप्रवृत्तिरितिनियमेकिंबीजं॥नचतत्रस्वदेशेवाक्यार्थबोधेबीजंपदार्थोपस्थितौतद्बोधेबाधकाभावात्॥तदेतदभिप्रेत्यो
२ क्तंपूर्वत्रासिद्धमितिसूत्रेभाष्येयद्यपीदंतत्रासिद्धमितिइतिचेन्न॥कार्यकालपक्षेसंस्कार्याकांक्षयैवपरिभाषाप्रवृत्तिः॥यथोद्दे
शपक्षेतुसंस्कारकाकांक्षयैवेतिनियमांगीकारात्॥एतच्चोत्तरत्रविशेषेणनिरूपयिष्यामः॥एतावानिति॥परिभाषादेशेइति
तत्रैवेत्यर्थः॥परिकल्प्येति॥एकवाक्यताभवतीत्यर्थेसमानकर्तृकत्वाभावात्॥क्त्वानयुक्तइतिकेचित्॥विधिप्रदेशइति॥तत्रै
वेत्यर्थः॥ आद्येकार्यदेशेविधिशास्त्रस्यद्वितीयेपरिभाषायाःस्वदेशेपृथग्वाक्यार्थोबोध्यः॥वाक्यतेति॥स्वदेशेपृथग्वाक्या
र्थबोधकत्वमेकदेशस्यत्वेतंत्रमितिभावः॥उक्तपक्षद्वयस्यसंज्ञापरिभाषामात्रविषयत्वेक्ङितिचेतिनिषेधसूत्रेकार्यकालप
क्षोत्थयोगइत्यतआह॥निषेधवाक्यानामिति॥तत्रेति॥निषेधसूत्रेइत्यर्थः॥पर्युदासन्यायेनेति॥क्ङितिनेत्यस्यतद्भिन्नेत्य
र्थइतिभावः॥ननुप्रथमंतान्यसमभिव्याहृतासमस्तनञोनपर्युदासार्थकत्वंभूतलेघटोनइत्यतः भूतलंभिन्नेघटइतिबोधा
भावात्इत्यरुचेराह॥प्रसज्येति॥सहयुगपत्॥विधिनिषेधयोरेकवाक्यतासंभवादितिभावः॥नपृथगिति॥संज्ञाशास्त्रा॥ रा॰
र्थबोधंविनाविधिवाक्यार्थबोधमात्रस्याप्यसंभवेनासाकांक्षितत्वान्नस्वदेशेवाक्यार्थइत्यर्थः॥तथाचतद्देशेवाक्यार्थबोध २
जनकत्वस्यतद्देशस्थत्वेतंत्रत्वेनतदभावेतदभावइतिभावः॥स्वदेशेवाक्यार्थबोधाभावस्यस्वदेशस्थत्वाभावेप्रयोजकत्वमु
पपादयति॥असिद्धत्वस्येति॥ननुशास्त्रासिद्धत्वपक्षेस्वदेशेवाक्यार्थबोधाभावेपिसंज्ञाशास्त्रस्यकुनागुत्त्वंसिद्धमतआह॥

(3A)

कार्यार्थितयेति कार्यज्ञानंचेति॥अनुनासिकरूपकार्यज्ञानंचेत्यर्थः॥परिभाषायास्तुस्वदेशेपि ढश्गवाक्यार्थबोधेनस्वदेशेऽस्यकार्य
ज्ञानं॥तद्देशस्थत्वस्येति॥स्वदेशस्थत्वस्येत्यर्थः॥असिद्धत्वाद्भावात्॥तद्देशस्थस्येतिपाठेनयुक्तः॥असिद्धत्वोपपादनवैयर्थ्या
त्॥ननुपदसंज्ञाविषयेयथोद्देशपक्षस्यैवांगीकारेत्रिपाद्यामप्रवृत्तिःस्यादतआह॥पदादीति॥आहुरिति॥अन्येतुसंज्ञाशास्त्र
स्यकार्यकालपक्षेस्वदेशेवाक्यार्थबोधकत्वंनयुक्तं॥पदपदार्थोपस्थित्याचसामग्र्याःसत्वात्॥अस्याकांक्षायाःतत्प्रतिबंध·
कत्वंत्वप्रामाणिकंसंज्ञापरिभाषयोः कार्यकालपक्षेस्वदेशस्थता विधिदेशस्थताच॥अतएवक्ङितिचेतिसूत्रेभाष्येकार्यका
लपक्षेतस्यांगाधिकारस्थतोक्ता तत्रविधिप्रदेशस्थत्वेनयौर्वापर्यैमुख्यविरोधप्रतिसंधानादेस्तत्रैवसंभवात्॥तदभावेपा
ठकृतमपितेनायादिभ्यःपरैवमग्रह्यसंज्ञेत्यादिभाष्यस्यतस्मिन्नितिसूत्रस्थवक्ष्यमाणभाष्यस्यचनासंगतिः॥भादिसंज्ञा
विषयेयथो—द्देशपक्षएवेत्यपिनयुक्तं॥भस्येत्युपस्थितमिदंभवतियचिभमितिभाष्यासंगतेः॥एमाविस्यादावितिवक्ष्यमा
णत्वत्ग्रंथासंगतेश्च॥किंचयथोद्देशपक्षेसंज्ञाशास्त्राणां परिभाषाणामिवस्वदेशेविधिभिरेकवाक्यतायांत्रिपादीस्थेनतद^
भावात्तत्रसंज्ञानस्यात्॥जातशक्तिग्रहेणेत्याद्यपिन॥तुल्ययुक्त्याग्रहीतपरिभाषार्थेनत्रिपादीस्थकार्यसंस्कारापत्तेः॥षष्ठी^
स्थानेयोगेतिपरिभाषाया अपिशक्तिग्राहकत्वेनसंज्ञाशास्त्रसमशीलत्वात्त्वद्रीत्यातस्याःत्रिपाद्यामप्रवृत्त्युपपत्तौतदभावापा
दनपरेणपूर्वत्रासिद्धमितिसूत्रस्थभाष्येणसहविरोधापत्तेश्चेत्याहुः॥ननुकार्यकालोयम्स्येत्यर्थेनकार्यदेशस्थत्वमेवार्थः संप
न्नइत्याशंक्याह॥कार्येणेति॥लिंगचिह्नितेतितदधीनप्रवृत्तिकेत्यर्थः॥अतएवेति॥काल्यतेस्वस्वप्रवृत्तिलिंगचिह्नितपरि

त्री० भाषाणामाक्षेपइत्यर्थः पर्यवसानादेव॥एतस्ययत्रकार्यंतत्रोपस्थितंद्रष्टव्यमित्युक्तमित्यनेना ˜ न्वयः॥तावताप्यसिद्धिरित्यभिप्रा
गा० यकेइति॥संस्कार्यदृष्ट्यासंस्कारकस्यसिद्धत्वेपिसंस्कारकदृष्ट्यासंस्कार्यस्यासिद्धत्वेनसंस्कारासंभवइतिआशयः॥यत्रकार्य
३ मिति॥संस्कार्यदृष्ट्यासंस्कारकस्यदर्शनमात्रेणपिशाचन्यायेनसंस्कारसंभवइत्याशयः॥यत्तुपूर्वत्रासिद्धमितिसूत्रेकैयटे
नोक्तं॥यद्यपीदमिति॥यथोद्देशपक्षे॥तत्त्विहसिद्धमिति॥कार्यकालंसंज्ञापरिभाषमित्यस्मिन्दर्शनेसंज्ञापरिभाषाणाम
स्यंतपारार्थ्यान्नस्वातंत्र्येणकार्यावगमहेतुत्वं॥केवलमाचार्येणलाघवायानेकप्रधानांगभावप्रतिपत्तयेपृथगुपदेशःकृ
तःततश्चतस्मिन्नितिनिर्दिष्टइत्यनेनकेवलेननकिंचित्क्रियतेनापिझलोझलीत्यनेनकिंतर्हिसंहत्यकार्यंक्रियते॥ततो
झल्यनंतरेपूर्वस्यसकारस्यझलःपरस्येतिवाक्यार्थः॥इत्येकवाक्यतायांपौर्वापर्याभावादसिद्धत्वाभावइतितन्न॥तथास
तिपौर्वापर्याभावादिदंतत्रनासिद्धमितिवक्तव्येतत्त्विहसिद्धमित्युक्तमसंगतेः॥किंचस्वस्वदेशेपरिभाषाविध्योर्वाक्यार्थ
बोधेपश्चात्परिभाषादृष्ट्यात्रिपाद्यांअसिद्धत्वेनैकवाक्यतैवदुर्लभा॥तथाचतयोरेकवाक्यतायांपौर्वापर्याभावादसि
द्धत्वाभावः॥तस्मिंश्चसतितयोरेकवाक्यताइत्यन्योन्याश्रयः॥तस्माद्यथोक्तमेवसाधु॥नचेति॥यद्यपितत्तद्देशस्थत्वंवा रा०
रयतीत्युक्त्वानैतच्छंकोत्थितिः॥तथाप्यधिकंवक्तुमियंशंकेतिनदोषः॥विधिवाक्येनैकवाक्यत्वाद्वास्वदेशंविहायपक्षि ३
वद्देशांतरगमनाद्वाप्रदेशेऽस्मादादिबुद्धिजननाद्वास्वदेशत्यागः॥नाद्यइत्याह॥नहीति॥प्रदेशेषुविधिवाक्यविषये॥
स्वबुद्धिजननेन॥एकवाक्यतयास्वार्थबोधेन॥अविशेषात्॥विधिवाक्यैकवाक्यतायाःपक्षद्वयेप्यविशेषात् इतिफ

(५७)

लितोर्थः॥नद्वितीयइत्याह॥नहीति॥नतृतीयइत्याह॥नापीति॥अस्मदादिबुद्धिजननेनप्रदेशे – एववाक्यैकवाक्यतये
त्यर्थः॥तद्देशेएववाक्यार्थबोधः स्वदेशत्यागेहेतुः॥नतुतद्देशएवैकवाक्यता॥अप्रयोजकत्वादितिभावः॥ अतएवेति॥
प्रदेशेएकवाक्यतायाःस्वदेशत्यागेप्रयोजकत्वादित्यर्थः॥अन्यथेति॥तत्रस्वबुद्धिजननमात्रेणतद्देशस्थत्वेइत्यर्थः॥व
स्तुतस्तुउक्तरीत्यासंज्ञापरिभाषयोःकार्यकालपक्षेप्रदेशस्थत्वमपि॥तयोस्तत्पक्षेकेवलंकार्यपारतंत्र्यात्॥एकदेशस्थ\
स्यसर्वशास्त्राभिज्वालकत्वंतुयथोद्देशपक्षाभिप्रायेण॥पाणिनिपाठाभिप्रायेणवा॥यथोद्देशेचतयोः स्वदेशेकार्यैकवाक्यत्वेपिप्र
धानानुगुण्येनैनगुणानांतद्देशस्थत्वकल्पनानैगुणानुरोधेनप्रधानेशास्त्रस्यतद्देशस्थत्वकल्पना॥ किंचगुणेननप्रधाना
कर्षणमित्युक्तं॥तथाचतेषांपरत्वंव्याहन्येतेत्याद्युक्तं॥कार्यकालशब्दोप्यत्रैवस्वारसिकइतिदिक्॥अनुबंधाअनेकांताः
॥अनुबंधाःविधेयानवयवाः॥विधेयेकदाप्यनुपलंभात्॥इत्यनुमानेव्यतिरेकव्याप्तिमाह॥योहीति॥यथाष्टस्यावयवशाखाया
अवच्छेदनात्पूर्वंतत्रोपलब्धिः॥विधेयेइति॥अनुबंधविनिर्मुक्तपदार्थोपस्थितेरितिभावः॥यद्वाबोधकानवयवत्वमेवसाध्यं॥
नचहेत्वसंगतिः॥बोधकानवयवत्वेबोध्यत्वविधेयत्वयोरपिसानुबंधकेस्वंरूपमितिशास्त्रेणप्राप्तिः॥केचित्तुउक्तानुमानेनबो
धकानवयवत्वमेवसाध्यं॥बोध्यबोधकयोरभेदाभिप्रायेणचायंहेतुरितिवदंति॥अवयवत्वारोपेणेति॥सामीप्येबहुव्रीह्यन
भिधानादितिभावः शिदादिपदंइत्संज्ञकः शकारादिर्यस्यसमीपेतद्बोध्यपरंव्याख्यानतइति॥दृश्यंचस्वकारेणांत्यत्वप्रयु
क्तेत्संज्ञाभाजांपूर्वोपकारकत्वंआदित्वप्रयुक्तेत्संज्ञाभाजांपरोपकारकत्वमिति व्यवस्था अत्रचेत्संज्ञांऽस्यत्वप्रयुक्तातत्रचादित्व\

Mandal, Dhule and the

(5)

त्री० प्रयुक्तेतितुव्याख्यानतोनिर्णयं॥एकांतत्वेपिपूर्वस्यपरस्यवाऽवयवत्वमित्यत्रतत्रापिव्याख्यानमेवशरणंइतितात्पर्यं॥परसमीपेतिकर्म
गा० धारयः॥एकांताइति॥बोधकस्येतिशेषः॥तथाचानुबंधाबोधकावयवाः॥बोधकेयेनसंबंधेनोपलभ्यंतेतेनसंबंधेनान्यत्रानुपल
४ भ्यमानत्वात्॥णितीत्यादीनांतुह्रोध्य इत्यर्थः॥उक्तानुमानेनविधेयानवयवत्वसाधनंसिद्धसाधनं॥कल्पांतरेतुइत्संज्ञालोपाभ्याम
पहारेणसानुबंधकस्याविधेयत्वोपपत्तेरप्रयोजकोहेतुः॥अनवयवत्वप्रवादादौलक्षणानाश्रयणमेवलाघवमनुकूलतर्कस्तदिदमुक्तं
॥एवंतर्हि इत्यादिना॥बोध्यबोधकयोरभेदाभिप्रायेणोक्तोहेतुरितिमतेतुविधेयतादशायांतत्रानुपलंभेपिउच्चारणदशायांतत्रो
पलंभादवयवत्वोपपत्तेरुक्तहेतुरप्रयोजकः॥एतेनसत्यपिपक्षेकस्याप्यसिद्धेरित्येवन्याय्यमित्यसंगतमित्यपास्तं॥कादेरिति॥
ददातीतिसूत्रेविभाषाग्रहणेननणशयोरित्संज्ञाज्ञापनेनतयोरित्यागइतिकेचित्॥इदंचिंत्यम्॥अंत्यशब्दवदादिशब्देपिलक्षण
येवोपपत्तेः॥किंचहलंत्यमित्येतत्सूत्राविषयेऽनुबंधविनिर्मुक्तोपस्थितेरप्रामाणिकत्वेनविधेयेकदाप्यदर्शनात् इत्यनेकांत
त्वसाधकहेतोस्तत्राभावेनणादेरेकांतत्वमेव॥केचित्तुनानुबंधकृतमित्यादिपरिभाषात्रयाकरणप्रयुक्तलाघवानुरोधेनानेकांता
इत्येवमुक्तमितिवदंति॥नानुबंधकृतमनेकाल्त्वं॥एकांतत्वइति॥विधौनिर्दिष्टोयोनेकाल्ससर्वस्येतिसूत्रार्थः॥तेनानुबंध रा०
विनिर्मुक्तपदार्थोपस्थितावपिनदोषः॥लोपोपीतिमत्कृतेपुनर्लोपग्रहणसामर्थ्यात् ध्वसोरितिलोपस्यसर्वादेशत्वसिद्धेर्नतदर्थ ४
मपिशिद्ग्रहणं॥असंजातविरोधन्यायेनोतरत्रैवालोंत्यपरिभाषाबाधसंभवात्॥वस्तुतस्तु विधीयमानोयोऽनेकाल् इत्यर्थे
पिअनुबंधानामनेकांतत्वेपिचशिद्ग्रहणंव्यर्थमेवेतिशंकायुक्तैव॥शकारोच्चारणसामर्थ्यादाद्यभूतपूर्वानेकाल्त्वमादायास्ये

(5A)

ऽनेकाल्पदे गौणमुख्यसाधारणावयवत्ववतोऽन्यपदार्थत्वमाश्रित्य सर्वादेशत्वसिद्धेः॥ ज्ञापकमिति॥ ननु ज्ञापितेपितु न व्यर्थं॥ श
कारोच्चारणसामर्थ्यादेवानुबंधकृतत्वमप्यनेकालत्त्वमादाय सर्वादेशत्वसिद्धेः॥ न चोच्चारणसामर्थ्यादित्त्वं ज्ञालोपावपि बाध्येयाता
मिति वाच्यम्॥ ज्ञापनात्पूर्वमपि तयोरबाधाय शिद्ग्रहणं स्यादिति तस्य नवैयर्थ्यं॥ यदि भूतपूर्वानेकालत्त्वमादाय सर्वादेशत्वं स्या
देनेन कृतार्थस्य शकारस्य नेत्त्वं ज्ञालोपबाधकत्वं तर्हि ज्ञापितेपि तथेत्यवेहि॥ पुरा वादौ तु विजातीयानेकवर्णोच्चारणसामर्थ्या
न्नेत्त्वं॥ नाप्यस्याः प्रयोजनं॥ अर्वणस्त्रसावित्यादौ ऋकारस्य नुमर्थत्वेन भूतपूर्वानेकालत्त्वमादाय सर्वादेशप्रवृत्तेः॥ विधौ यो
नेकालित्यर्थे तु न मानमिति चेन्न॥ उच्चारणसामर्थ्येन भूतपूर्वानुबंधकृतानेकालत्वमादायापि न सर्वादेशत्वमित्यर्थस्य शिद्ग्रह
णेन ज्ञापनात्॥ तेन दिव औदित्यादीनां तकारोच्चारणसामर्थ्येन भूतपूर्वंगत्यानेकालत्त्वमादाय न सर्वादेशत्वं॥ तत्र ज्ञापितपरएकर
णेतु एषाव्यर्थैतितत्त्वं॥ डादिविषये त्विति॥ केचित्तु अत्रानुबंधपदं तद्योग्यपरं॥ अत एव काणो विषये नानुबंधकृतत्वमसारूप्य
मिति विकल्पाभावः॥ अनेकालसूत्रे शित्यदं तद्योग्यपरं॥ अत एव डा आ इति प्रश्लेषेण सर्वादेशत्वमुक्तं अकार इति वदंति॥
अनेजंतत्वादिति॥ नन्वादेच इति सूत्रे धातोरित्यस्य निवृत्तौ यां तस्यानेजंतत्वेपि ततः पूर्वमेजंतमादायात्वं सुलभम्॥ न चैधाद्य
वात्त्ववारणाय शित्परत्त्वयोग्यस्यैवैजंतस्यात्वमिति पकारसत्तायां नात्त्वं अनेजंतत्वादित्यस्य शित्परत्वयोग्यैजंतत्वाभावादित्यर्थ इ
तिवाच्यं॥ यलोपोत्तरं तत्संभवात्॥ कथं वात्र तदंतविधिः॥ विशेष्याभावात्॥ न चोपदेश इत्यस्य विभक्तिविपरिणामेन विशेष्यतया
तदंतविधौ समुदायोपदेश एवऋषीणां तात्पर्येण पकारसत्त्वे उपदिश्यमानैजंतत्वं नेत्यात्वं नेति वाच्यं॥ तथा सति यलोपोत्तरमिति

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

त्री० पूर्वोत्तरग्रंथासंगतिरितिचेन्न॥ यत्तोपोतरंतदेवेदमितिप्रत्यभिज्ञयाएकाचइत्यादावेवोपदिश्यमानस्ये जंतत्वस्यचसत्वेनादो
गा० षइत्याशयात्॥ज्ञापकमिति॥ माङोव्यतीहारेनभिधानं॥एतद्भाष्याप्रामाण्यादितिभावः॥ विस्तरइति॥ यद्यपिउञिचपदइत्य
५ त्रपदग्रहणात्॥घिसंज्ञासूत्रेनदीतरेह्रस्वापादान परभाष्यात्स्यानिवत्सूत्रेअतिखट्वायेत्यत्रनदीघेंकृतेपि अप्राप्तेभूतपूर्वइ
तिभाष्यात् चानुबंधसहितशब्दोपादानेइत्संज्ञकतद्वयस्येत्यर्थः॥ स्त्रीलिंगप्रकरणेप्येवंप्राव्दरत्ने॥ क्यस्येत्यत्रचेत्संज्ञ
ककाद्यवयवकस्येत्यर्थइतिनयकिदोषः॥तथापितदनाश्रित्येदमित्यदोषः॥अभिधानियामकेति॥तत्वंचशक्तिसंकोचकत्वं
॥तत्वंचतात्पर्यज्ञानस्यशाब्दबोधकरणत्वेतद्ग्राहकत्वंतदभावेप्रकरणसहकृतात्पदज्ञानादर्थविशेषस्यैवोपस्थितत्वादर्थ
विशेषेशाब्दबोधप्रयोजकपदजन्योपस्थितिविषयतानियामकत्वंबोध्यं॥त्यंतेति॥अर्थवत्त्वंतेत्यर्थः॥तेनकतीत्यस्यसत्वे
ऽपिनदोषः॥अकृत्रिमस्येवेति॥सूत्रभेदेनकृत्रिमस्येवाकृत्रिमस्यैवेत्यर्थप्रयोपिउभयगतिएगतैवेतिभावः॥शब्दार्थेतिद्वंद्वः॥नबो
धोपयोगीति॥यद्यपिसकलादिशब्दानांसामान्यरूपेणशक्तिग्रहादेवशाब्दबोधः॥ विशिष्यसकलज्ञानस्यासंभवात्॥तथापिहर्यादि
पदानामिवविशेषरूपेणानेकार्थबोधकस्यहर्यादिशब्दस्यविशेषरूपेणानेकेषुशक्तिग्रहएवतेषांतथाशाब्दबोधोपयोगी॥ ए०
शक्तिग्रहशाब्दबोधयोऽसमानप्रकारकत्वेनैवकार्यकारणभावांगीकारादितिनकश्चिद्दोषः॥शयितेति॥क्तजंतःपाठः॥क्त्वांतेतु॥ ५
निष्ठाशीङ्इतिनिषेधादेवगुणसिद्धेः॥कार्यमनुभवन् यत्कार्यंप्रतियः कार्यीसततप्रतिनिमित्तंनेत्यर्थोबोध्यः॥यद्यपिशयिता
अशिषतिइत्यादौकार्य्यानुभवित्वंइकारादेर्निमित्तत्वंचसमुदायस्य॥तथापिघटकतयापिनिमित्तत्वस्यनिषेधान्नदोषः॥ ॥

(6A)

समवायीति॥ तत्त्वंचात्रकल्पितंबोध्यम्॥इदंचिंत्यं॥कालसंयोगंप्रतिकालस्याहेतुत्वनयेजगत्प्रतिब्रह्मणः तदुभयदर्शनात्॥केचित्तु
अदृष्टकार्यस्थलेसमवायिकारणस्यनिमित्तकारणत्वंनतेनप्रायसाविसाद्येरुकादेशस्याचःपरस्मिन्निमित्तस्थानिवत्त्वमित्याहुः॥ध्व
नितेति॥अचीत्यस्यजेघ्नीयतेदेध्नीयतेइतिचप्रत्युदाहरणंअस्यांप्रतिकूलमितिनात्रैषाध्वनिता॥द्यपेरिति॥परिभाषासिद्धेःपूर्व
मपिदारूपस्यनिरर्थकत्वमित्याशयः॥बोध्यतइति॥घटकतयेतिशेषः॥नद्यारिति॥अवयवावयवइतिन्यायस्तूसमुदायावयव
त्वेनगृहीतस्यावयवविषयकः॥प्रकृतेतुरेफस्याकारावयवत्वप्रतिपत्तिकालेनाकारस्यदृशब्दावयवत्वप्रतिपत्तिरितिभावः॥द्यु
द्युलोष्टित्वमत्रज्ञापकं॥यद्वाशेरतेएधिषीष्टेत्यादौरुट्स्कइविधौ उद्देश्यतयापरंपरयावाआत्मनेपदलिङ्गोराश्रयणं॥दारय
तीत्यादौतुनैवं॥तद्वैयर्थ्यमिति॥ननुसानुनासिकोकारार्थंतत्॥किंत्वामृशब्दस्यकंठोष्ठ्यतयाक्षावर्ण्याभावः॥किंचनिर्दिश्यमानप
रिभाषयानात्रदीर्घसंभवइतिचेन्न॥आनस्यऊँइत्यनुनासिकादेशविधायदीर्घविधौअकइत्यस्यपंचम्यंततांचाश्रित्ययद्यागम
न्यायेनैवसावर्ण्यमुपपाद्यवैयर्थ्योद्भावनसंभवात्॥वस्तुतःमुकिकदाचिदोकारस्याचिदीर्घस्यआद्वत्वाडेइतिन्यासेनतदसिद्ध्या
नैतत्ज्ञापकंकिंतुस्वसिद्धसूत्रस्थोपदेशग्रहणमेवात्रज्ञापकं॥दुग्युटाविति॥सिद्धवचनसामर्थ्यादेवयणूनइत्यरुचेराह॥जहारेति॥
यत्तुभैरवेणोक्तं तन्नकौंडिन्यन्यायेनयुडावाधितस्ययणूनेतितदसंगतं॥विषयभेदेतन्नकौंडिन्यन्यायाप्रवृत्तेर्वक्ष्यमाणत्वात्॥अ
सिद्धविषयेप्युक्तन्यायाप्रवृत्तेर्वक्ष्यमाणत्वाच्च॥यदागमन्यायेनलब्धस्यतपरत्वेननव्यावृत्तिरितिक्रदंतशेखरे॥असंगतेति॥न
नुवक्ष्यमाणोभविष्यामीत्याद्यर्थमकारांतोपदिश्यमानइत्यर्थं आवश्यकः॥किंचहतइत्याद्यर्थंतदंतविधिरावश्यकः॥अन्यथा

(२)

त्री॰ दुपदेशात्परत्वेनानुदात्तत्वापत्तेः॥तथाचनात्रवर्णग्रहणंतास्यनुदात्तइतिसूत्रेशेखरेप्येवमेवोक्तं॥एरनेकाचइत्यत्रप्रसयावयवेऽची
गा॰ त्यर्थः॥यद्वायस्योपदेशेऽदंतत्वमेवयद्वागमन्यायलभ्यमितिएरनेकाचइत्यत्तोऽस्यवैषम्यंनचजहिशत्रुमित्याद्यर्थंप्रत्ययाप्रत्ययोर्म
६ ध्येप्रत्ययस्यैवग्रहणमितिपरिभाषाऽनुसर्तव्यातथाचतत्तएवहतइत्यादौनदोषः॥भविष्यामीत्यादौतुसमुदायोपदेशेऽवयव।
स्याप्युपदेशान्नदोषइतिवाच्यं॥तदंतविध्यभावेउक्तपरिभाषयाप्रत्ययस्यैवकारस्यग्रहणापत्तावक्ष्यमाणइत्यादौदोषः।
तदवस्थएवेत्यरुचेराह॥किंचेति॥बोध्यतइति॥यद्यपीदंपरिभाषांतरंतथापीदमपितद्ग्रहणेनगम्यतइति अत्रघटकतये।
ति अस्यानध्याहारेणैवतन्मूलकमेवेतिभावः॥यद्वानुविधानेनपूर्वस्याइवास्या अपिवर्णग्रहणेऽप्रवृत्तिरेवज्ञाप्या॥वर्णग्रहणे
पूर्वाप्रवृत्तिकल्पनामात्रेणसुखेयव्यर्थापरिहारात्॥इदंचिंत्यं॥आगमानानागमिधर्मवैशिष्ट्येमानाभावात्फलाभावाच्च॥प्रस्तु
तमिद्वोंत्यादितिसूत्रेभाष्येपरादित्वेहिषंतपद्धसत्रमोनुस्वारइत्यस्याप्राप्त्यापादनंविरुध्यते॥रामाणामित्यादौपदांतस्येतिण
त्वनिषेधापत्यातदनित्यत्वाश्रयणेमहाक्लेशः॥पदांतभक्तःपदांतग्रहणेनग्राहिष्यतेइतिङमुट्सूत्रस्यभाष्यस्यायमर्थः॥यद्वाग रा॰
माइतिन्यायेनाट्कुप्वाङितिसूत्रेनस्येत्यनेनङमुट्सहितस्यैवग्रहणात्कुर्वन्नास्तेइत्यादौद्वयोर्नकारयोर्णत्वंप्राप्तंपदांतस्येत्यने ६
नवार्यते॥द्वयोर्नयोःपदांतत्वेङमोपिपदांतत्वेनतावन्मात्रस्यणत्वं॥पदांतस्येत्यत्रपदांतपर्याप्त्यधिकरणीभूतस्येत्यर्थेतुनमानं
॥फलाभावाच्च॥नस्येत्यस्यपदांतविशेषणतयानकारपर्याप्तपदांतत्वाश्रयणत्वनिषेधान्नरामाणामित्यादौदोषः॥तत्रचवर्णग्र
हणेएषएवयद्वागमन्यायोभाष्याभिमेतइतिदिक्॥अस्याज्ञापकमाह॥अतएवनेटिइति॥अयमर्थइति॥टितइत्यत्रबहुव्री

Rajwade Sanshodhan Mandal, Dhule

(7A)

हिः॥आर्द्धधातुकइत्यस्यस्थानषष्ठ्यंतताश्रयणपरमाद्यंतावितिसूत्रस्थंभाष्यंत्वेकदेशिपरमितिभावः॥नत्यागइति॥आहत्या
एरुरित्यादौद्विविधोपिस्थान्यादेशभावोविवक्षितइतिभावः॥षष्ठ्यंतइति॥अंतःशब्दःसमीपवर्तिप्रकृतिवचनः॥सूत्रेषष्ठीश
ब्दःतत्प्रकृतौलाक्षणिकःनिर्दिश्यमानइतिवाध्याहारइतिभावः॥प्रत्युच्चारणंशब्दभेदात्लक्ष्यस्थस्यननिर्दिश्यमानत्वमतआह
॥सजातीयमिति॥अवयवरूपमिति॥ननुतदोरित्यादौत्यदादीनामित्यादेर्नस्थानषष्ठीत्वमितिकथंतत्रैतत्प्रवृत्तिःइतिचेदत्रन
व्याः॥तदोरितिस्थानषष्ठीबलेनोपस्थितेषालत्रापिफलाभावाद्विशेषणेपर्यवस्यति॥इतिवदंति॥परेतुसर्वादिसूत्रस्थभाष्यतः।
योग्यतरान्वितेस्वार्थेपदानांशक्तिलाभेनस्वंरूपमितिशास्त्रातिरिक्तशक्तिग्राहकशास्त्रानुसंधानकालीनोपस्थितिविषयत्व
स्यैवनिर्दिश्यमानत्वेनतदोरित्यतश्चतदंतविधितः पूर्वत्यदाद्यवयवतदोरेवोपस्थित्यातयोरेवनिर्दिश्यमानत्वान्नातित्य
दित्यादौदोषइतिप्राहुः॥नमतीयमानमित्येवपाठः॥इत्यर्थइतिपाठेयुज्यतेइत्यस्यपूर्वेणान्वयः॥अयमर्थइत्यस्यचशाब्दो
र्थइत्यर्थः॥इत्यर्थइत्यस्यचार्थिकोर्थ इत्यर्थः॥धात्वादीनामिति॥येनरूपेणप्रयोगघटकतातेनरूपेणपदोपस्थाप्यत्वंनि।
र्दिश्यमानत्वं॥धातुपदाच्चभ्वादीनांतेनैवरूपेणोपस्थितिरितिभावः॥स्पष्टार्थमिति॥अत्रद्वयोर्विरोधेनपरयाऽनेकाल्इत्य
नयाःस्यबाधःस्यादतोङित्वंसफलमितिकेचित् विरोधादिति॥यद्यपिविसर्गस्यनोच्चार्यमाणत्वं॥तथापिपूर्वोक्तरीत्यानिर्दि
श्यमानत्वंनिर्वचनीयं॥केचित्त्ववोध्याघटितत्वेसतिस्वबोध्यत्वंतत्वंइत्याहुस्तन्न॥नचास्यच्चावित्यादिपूर्वग्रंथविरोधात्॥
भिधकीत्यादौसाकच्कस्यहिशब्दाघटितत्वेनतत्वापत्यातदभावमतिपादकेनहुश्नल्भ्य इति सूत्रस्थभाष्येणविरोधाच्च॥ ७॥

(8)

त्रि० ॥इदंचिंत्यं॥वर्णग्रहणेइत्यस्याल्ग्रहणेइत्यर्थात्॥नापीति॥विधिप्रदेशेद्वयोरंगांगीभावेपित्वात्तंत्र्येणद्वयोर्नेसः॥तेनपरस्परनैरपे
गा० क्ष्येणद्वयोः प्रवृत्तिसिद्धिः॥तत्रालोंत्यस्येत्यनेनास्याः क्वचित्सामानाधिकरण्यं॥यथाणेरनिटीत्यादौ ण्यंतांगस्यांत्यस्यालोपेरित्य
७ र्थात्॥क्वचित्वैयधिकरण्यं॥यथात्यदादीनामइत्यादौ॥तेनतानीत्यादौनतुमः त्यदाद्यत्वं॥उदःस्थादितीति॥अस्मिंल्ल
क्ष्येइत्यर्थः॥सूत्रविषयेइति॥उदःस्थेतिसूत्रविषयेइत्यर्थः॥उदस्थेतिसूत्रविषयेइतिपाठः सुगमः॥संचारितत्वादिति॥एतत्बा
धकयोरपिएतत्बाध्यपदागमन्यायोपजीवनेनोदस्थादित्यादौतयोः प्रवृत्त्याएतत्बाध्यत्वमितिकैयटाशयइतिपरे॥अकच्
विषयेइति॥साकच्कानपहारकादेशविधावित्यर्थः॥अत्रमानमनाप्य क इतिप्रतिषेधः॥फलंतुसुवकाभ्यामित्यादौ आत्व
सिद्धिः॥तदपहारकेतु यतिश्चेतएवन्यायः यथाहुर्झल्यइतिसूत्रेभाष्येभिंधकिइत्यादावकविहितत्वाभावान्नधित्वमित्याशंकि
तं॥कादेशस्त्वाद्वत्वात्पुनः विधानसामर्थ्यात् समकच्चकस्यापिभवतीति॥अत्रेदंविचार्यते॥एषाऽर्थवद्ग्रहणपरिभाषायाः बाधिका
उत न॥नांत्यः॥लावस्थायामडितिपक्षेअपिबत् इत्यादौपिबादेशानापत्तेः॥स्यसिच्सूत्रेभाष्ये आगमसंन्निधानेतद्ग्रहितस्या
र्थवत्त्वाभावोक्तेः॥नाद्यः॥राजेः पृथक्भ्राजिग्रहणवैयर्थ्यात् वानरशब्देन नरयोरितिह्रस्वापत्तेश्च॥एवंधातुत्वमस्ययत्नाद्य रा०
पि आगमसन्निधानेतद्ग्रहितेंगीक्रियतेनवा॥नतावदाद्यः॥स्यसिच्सूत्रस्थभाष्यविरोधात्॥किंचग्रहोलिटिइत्यत्रएकाच ७
इत्यस्यसंबंधेअग्रहीष्टामित्यत्रशेखरोक्तदीर्घाभावापादनासंगतिः॥अड्रहितस्यैकाच्त्वात्॥नांत्यः॥धातोर्वृद्धिमतः स्मरे
दितिवार्तिकविरोधात्॥लावस्थायामडितिसिद्धांतेऽस्वदीत् इत्यादौअतोहलादेरितिवृद्ध्यनापत्तेः॥तत्सूत्रंतुमाङ्योगेचरिता

(8A) र्थे ॥ किंचाज्जसेरित्यादौ पूर्वासइत्यत्रासुकि जसः शीभावः स्यादित्याशंक्य निर्दिश्यमानपरिभाषयापरिहृत्य यस्तर्हि निर्दिश्य
ते इति पुनराशंकितं ॥ तच्चोक्तपक्षेऽसंगतं निर्दिश्यमानजसोऽर्थवत्त्वाभावात् ॥ एवं यदागमन्यायस्य वर्णग्रहणेऽप्रवृत्तौ मू
लोक्तानि दूषणानि प्रवृत्तौ लण्सूत्रस्थभाष्यविरोधः ॥ तत्र हि परेणाण्ग्रहणे चिकीर्षतीत्यादौ दीर्घे रपरत्वे इत्त्वाप्राप्तिमाशं
क्य उपधायाश्चेत्येवं भविष्यतीत्युक्तं ॥ त्वद्रीत्या तूक्तन्यायेन रपरत्वेऽकृदंतत्वान्निर्दिश्यमानऋकारस्येत्वे रूपसिद्धेः शंकाया अ
संगतिः ॥ अत्त्वावर्णत्वयोरपि आगमसहिते एव सत्वेन समाधानासंगतिश्च ॥ अनित्यत्वादुक्तन्यायाप्रवृत्तौ दृष्टस्थले प्रवृत्तेरा
वश्यकतया तत एव मातॄणामित्यादौ उपधायाश्चेति इत्त्ववारणे तदर्थं धातुग्रहणावश्यकत्वोक्त्यसंगतिः ॥ किंच जहर्थेत्या
दौ गुणे प्यजंतसन्निपातेनाचस्तास्वदिति सूत्रस्थं स्यसिचूत्रस्थं भाष्यं च विरुध्यते ॥ एवं निर्दिश्यमानपरिभाषाया वर्णग्रह
णेऽप्रवृत्तौ मूलोक्तं दूषणम् ॥ प्रवृत्तौ देवदत्तातैस्या दाविव पचमान इत्यत्रापि निर्दिश्यमानपरिभाषयासुको दीर्घाभावेपि वि
शिष्टस्य सवर्णदीर्घे तद्देय्यर्थ्यमिति पूर्वग्रंथाऽसंगतिरिति ॥ अत्र ब्रूमः ॥ निर्दिश्यमानपरिभाषया अर्थवत्परिभाषाबाधकत्वं ।
नामागमप्रवृत्तेः पूर्वमागमिनो यथाऽर्थवत्त्वं तत्तत्त्यदबोध्यत्वादितदागमे जातेपि तथैवेति वार्तिके धातुग्रहणसामर्थ्यात्तत्त्वेन दृ
ष्टपरं ॥ हलादेरिति चातो विशेषणं यदागमन्यायस्तु वर्णग्रहणे न प्रवर्तते ॥ ।स्यसिचूत्रे उपदेशग्रहणात् ॥ पदांतत्वस्य वर्ण
मात्रवृत्तित्वाभावादेव न दोषः ॥ गुणादिसंज्ञा रेफरहिते एव ॥ वर्णग्रहणे उक्तन्यायाप्रवृत्त्या सरेफस्य गुणत्वाभावेऽपि रेफस्य व
चनबोधितावयवत्वागेमानाभावेनावयवव्यवहारकांत्तर्यमादायाराणेवेति नियमोपपत्तेः ॥ एतेन रदाभ्यामिति सूत्रस्थं भाष्यमपि

(९)

त्रि० व्याख्यातं॥उत्सर्गसमानदेशाअपवादाइतिन्यायेननिर्दिश्यमानपरिभाषापिनाल्ग्रहणे॥अतएवानुमानिकस्यान्यादेशभावे
गा० ईवर्णोतस्यतुर्विधीयमानोनेकारमात्रस्येतिदिक्॥पदस्मिन्निति॥अर्थतआंतर्यवत्तएवादेशत्वेनिर्णीतेपदादिभिःआदेशैः।
८ स्वानुरूपस्थान्याक्षेपसिद्धिर्नान्यथेतिभावः॥समानवर्णइति॥तत्फलंतुचरणस्यनपदादेशः॥तस्यतस्मिन्नपुंसकत्वापत्तिः॥
कल्पितान्वयेति॥अन्वयव्यतिरेकौयत्सत्वेयत्सत्वंयदभावेयदभावोतौचप्रकृतिप्रत्ययादितिकल्पितावेवेतिभावः॥वर्ण
ग्रहणेषुनेति॥अत्रमानंनेदमदसोरकोरितिसूत्रेऽकोरितिप्रतिषेधः॥सुखमिवेति॥शाखादिभ्योयः॥निपातपदमिति॥ननुचा
दीनांतथापस्थित्याउपतिष्ठतांनामतद्वारणा॥च्व्यंतस्यतुनतथेतिक.यंतत्रविशिष्टरूपोपादानं॥किंचप्रकृतावारोपेणवर्तमान
देवच्विविधानेनतस्यनमुख्यगौणार्थौसंभवतः॥किंचैवंनिपातोद्देश्यककार्यमात्रेच्व्यंतस्याग्रहणापत्तिरितिचेदत्रकेचित्॥
चाद्यंशेविशिष्टरूपोपादानमात्रेणप्रवृत्तापरिभाषांऽशांतरमनुगृह्णाति॥कार्यांतरेत्वनित्यत्वादस्याप्रवृत्तिरितिभावः॥देवताद्वं
द्वेति॥अत्यंतसहचरितेलोकविज्ञातेद्वंद्वमित्युपसंख्यानमितिवार्तिकेनिष्पन्नस्यात्रग्रहणं॥ओत्सूत्रस्थंकौस्तुभोक्तंदूषणंपरि
हरति॥गांपाठयेति॥अस्यपदकार्यविषयत्वेशूद्राचेतिसूत्रेजातिग्रहणमपिलिंगं॥ननुकिमिदंपदकार्यत्वं॥नतावत्पदो ए०
द्देश्यकत्वं॥तद्धितविधावनुपस्थानापत्तेः॥तेषांवस्तुतःकृवंतात्प्रवृत्तावपितदनुद्देश्यकत्वात्॥नापिवस्तुतःपदसंबंधित्वंणि ८
त्वस्यापितथात्वात्॥लक्ष्मूतइत्यादौत्वाद्यादेशानापत्तिश्च॥नापिप्रत्ययानिमित्तकत्वंतत्"हरितादिभ्योऽञ्इत्यस्यापितथात्वेन
तत्रैवतस्याप्रवृत्तौगोणेभ्योपितेभ्यः फगापत्तिरितिचेन्न॥अंगसंज्ञाऽनिमित्तकत्वेसतिवस्तुतःपदसंबंधिकार्यत्वंतत्त्वमिति

(9A)

नकश्चिद्दोषः॥अंगग्रहणादिति॥इणइत्यस्यषीध्वमादिविशेषणत्वेनबुबुधिध्वेइत्यादौनदोषइतिभावः॥परस्यरेति॥एकेनयो
गेनसंबंधेननिर्दिष्टानामितिविग्रहः॥अत्रचज्ञापकंस्रुवामंत्रितइत्यतःस्रुबित्यनुवर्तमानेस्रुप्रतिनेत्यत्रपुनःसुपग्रहणं॥अ
संबंधार्थमिति॥संबंधशंकावारणार्थमित्यर्थः॥तावन्मात्रांशइति॥वस्तुतःसंख्यापदेस्वरितत्वंप्रतिज्ञायपुनरादिपदेतत्
प्रतिज्ञानमेतन्मूलकं॥केचिदादिमंपरित्यज्यांतिमेनप्रतिज्ञातं॥सामर्थ्यादिति॥योगविभागसामर्थ्यादित्यर्थः॥ज्ञापयती
ति॥स्थालीपुलाकन्यायेनसूचयतीत्यर्थः॥ज्ञापकमिति॥ननुज्ञापितेपिव्यर्थंलोपेनसिद्धेःअकारविधानसामर्थ्याद्दी
र्घरूपसिद्धेरितिचेन्न॥लोपेसत्यहंसार्वेतिदीर्घापत्तेः॥द्विवडदिति॥च्छ्वोःशूडित्यत्रकिंग्रहणाननुवृत्तिपक्षमाश्रित्येदंत
दनुवृत्तिपक्षेआह॥ऋत्तडदिति॥नन्वेवंऊदुपधायाइत्येनसिद्धेदीर्घोच्चारणंव्यर्थमितिचेन्न॥गुहेण्यंताच्चडिउपधाकार्य
र्यस्यद्वित्वात्प्राबल्येनगुणोर्उत्वेणौचङीतिह्रस्वाप्रसक्तेर्घ्राप्रसर्पतात्॥कुरुतइत्यत्रउदितितपरत्वेनगुणाप्रवृत्तिवत्॥अतएव
उदुपधायागोहइतिसूत्रेऊइतिप्रश्लेषेणगोहइतिविष्टतनिर्देशोभाष्येकृतामत्याख्यातःअजुगूहदित्यर्थंप्रश्लेषस्यावश्यक
त्वात्॥नचोत्वदृष्ट्याणौचङीतिह्रस्वस्यचबहिरंगतयासिद्धत्वेनबाधासंभवइतिवाच्यं॥उदितिदीर्घोच्चारणसामर्थ्येनउक्तभाष्य
बलेनचबहिरंगस्याप्युपधात्वनिमित्तकह्रस्वस्यबाधकल्पनात्॥प्रत्ययस्येतरविशेषणत्वेति॥वर्णविशेषणत्वेइत्यर्थः॥स्फु
टमेतदिति॥पाणिनेस्त्वित्यादि॥दिवादेरिति॥ततश्चरूपोधात्वितिलुगापत्तिरितिभावः॥शब्दस्वरूपमिति॥केचित्तुतदादेरित्यंश
स्यविशेष्यतयातदंतविधिरित्याहुः॥अंशमात्रेति॥तदंतांशस्तुनोपतिष्ठते॥लेखग्रहणेनसामान्यतएवसप्तम्यंततयोपात्तेप्रत्य

(१०)

त्रि० चैतदंतविद्ध्यभावकल्पनात्॥तेनस्तुपिचेत्यादौनतदंतविधिः॥तत्रतदाद्यंशोपस्थितिफलंतुसुभूद्देवदत्ताभ्यामित्यादौसात्यदाद्यो
गा० रितिनिषेधाभावःकथंचित्फलंबोध्यं॥एवमिति॥प्रत्ययग्रहणेचेतिनिषेधस्तुतदंतांशमात्रस्येतिभावः॥एङंतादिति॥नन्वेवम
९ पिकृतरदित्यादौअतिप्रसंगस्तदवस्थः॥तदादित्वस्यप्रत्ययावयववाकारांतेपिसत्वादितिचेन्न॥तत्रतदादीत्यंशोपस्थितिसाम
र्थ्येनसंबुद्ध्यवयवाघटितस्यैवतदादेर्ग्रहणात्॥अंगसंज्ञायांप्रत्ययावयवाघटितस्यैवतदादेर्ग्रहणेनात्रापितादृशस्यैवग्रही
तुमुचितत्वात्॥नविशिष्टादिति॥विशिष्टस्यतु अर्थवत्सूत्रेणप्रातिपदिकत्वं॥समासग्रहणकृतनियमस्तुन॥राजपुरुषावि
त्यादौपुरुषाविसादेरिवगार्ग्यायणस्यानर्थकत्वेनार्थवदंतर्भावाभावात्॥नियमस्यसजातीयापेक्षत्वेनपरस्परसमानाधि
करणवृत्तिद्वयाश्रयाघटितएवप्रवृत्तेः॥कुमारीश्रितइतियुगपत्वृत्तिद्वयकल्पनयापिप्रातिपदिकत्वंसमुदायस्यसुलभं
अत्रसमासत्वमसुक्तत्वमवयवस्ययद्यपिप्रातिपदिकत्वंकृतद्धितेतिसूत्रेणास्ति"तथापिसुब्लुगुत्पत्तिःसमुदायादेव॥एका
च्द्विर्वचनन्यायात्॥प्रत्ययमात्रेवृत्तिं॥तत्फलंतुउगितश्चेत्यस्यप्राचीत्यादौप्रवृत्तिः॥अन्यथाउगित्यस्माद्विहितःतदादे
वाभावात्॥तत्रतदन्तापत्तिः॥ननुप्रतीषिषतीत्यत्राभ्यासात्परस्याइण्नेतिदीर्घवारणायोत्तरखंडेप्रत्ययत्वाभावस्यशब्देन्दु ग०
शेखरेउक्तत्वेनसन्वत्वस्यप्रत्ययाप्रत्ययसाधारण्येनसनाद्यंताइत्यत्रकथमेतदुपस्थितिरितिचेन्न॥प्रत्ययमात्रग्रहणइत्यस्य ९
प्रत्ययधातूभयसाधारणरूपग्रहणात्इत्यर्थेनादोषात्॥यद्वासन्त्वस्यप्रत्ययाप्रत्ययसाधारण्येपिसनाद्यंताइत्यत्रप्रत्ययाधि
कारस्थस्यैवग्रहणेनादोषात्॥वस्तुतःद्विर्वचनेसन्प्रत्ययत्वादिसमुदायेएवनोत्तरखंडेइतिसन्त्वंप्रत्ययमात्रवृत्ति॥अतएव

(10A)

स्फविनिरदुर्भ्य इति सूत्रे कैय्यटेन विष्णुषुषुः इत्यत्र समुदायस्यैव स्फपित्वमुक्तं॥ दयतेरिति सूत्रस्थं भाष्यं तु सागमकस्यैव साभ्या
सस्य निर्दिश्यमानत्वाभावेन उत्तरखंडस्यैव तत्त्वेनोपपन्नं॥ अत एव भ्रस्जो रिति सूत्रे भाष्ये वरीभृज्जते इत्यत्र रीको रेफस्य लोपा
माशंक्योपदेश इत्यनुवृत्त्या समाहितं॥ अत एवोर्णुनुवतु रित्यादौ हित्वे उवङ्॥ अनुषस्यंद इत्यत्रानुविपर्यभिनिभ्य इति षत्वं
धत्त इत्यत्र दधस्तथोरिति भष्भावः॥ प्रतीषिषतीत्यत्राभ्यासस्य दीर्घाभावश्च सिद्धः॥ स्यादिष्विति सूत्रे नव्योक्तं सुनोत्याद्यव
यवस्यैव तत्त्वं बध्यव यवस्यापि षत्वार्थत्वं॥ यद्वात्र प्रकरणे तत्त्वहान्तोरिव ततदानुपूर्वीकस्यापि ग्रहणमित्यादि तु स्वरूपव्या
ख्यैव पराकृतं॥ प्रतीषिषतीति॥ इत्यत्रोत्तरखंडे सप्रत्ययाधिकारस्यत्वाभावे च उत्तरखंडस्य तनादि   शेषे स्वोक्तं धातुत्व
मपि न स्यात्॥ भ्वादित्वाभावात्॥ ननु उत्तरखंडस्य प्रत्ययत्वाद्यनंगीकारे प्रतीषिषति इत्यत्र कथं सन्यत इतीत्वमिति चेन्न॥
सन्यत इत्यत्र सनी सस्य निमित्तसप्तमीत्वेन सन्निमित्ताभ्यासस्येत्यर्थे नादोषात्॥ प्रत्ययाद्य समभिव्याहारे तु अज्झनेति दीर्घे
णाई षिषतीत्येव साधु॥ आटिट दित्यादौ णिलोपस्तु ध्यंतां गस्यानित्यस्याल इत्यर्थेन स्फलभः॥ एवं च पूर्वं धातुःसाधनेनेति सि
द्धांते हित्वोत्तरं नेर्विंश इत्यादीनां प्रवृत्तिः साधुः संगच्छत इति दिक्॥ यत्रेति॥ अपंचम्या इति प्रसज्यप्रतिषेध इति भावः॥ एं
कार्यांतरविधानायेति स्वरूपकथनं॥ धातुतकारस्येति॥ स्वं रूपं शास्त्रातिरिक्तसंज्ञाशास्त्रं विनोपस्थाप्यत्वं निर्दिश्यमान
त्वमिति नात्र सोपतिष्ठते॥ अत एव रदाभ्यामिति सूत्रे भाष्ये रदाभ्यामिति किमर्थं चरितं मुदितं॥ ननु रदाभ्यामित्युच्यमाने
प्यत्र प्राप्नोति॥ न रदाभ्यां निष्ठा विशेष्यते किं तर्हि तकारो विशेष्यते इत्युक्तं॥ अन्यथा निर्दिश्यमाननिष्ठायाः रेफदाभ्यां पर

(11)

त्रि॰ त्वाभावेनातिप्रसंगवारणेनतदसंगतिः सूत्रेतग्रहणमप्युक्तार्थे एवसफलंनान्यथेतिदिक्॥एकविषयत्वमिति॥तदादितदं।
गा॰ तांशयोः सामानाधिकरण्येनान्वयेइत्यर्थः॥ननुस्यतासीइत्यत्र धातोरित्यस्यस्यतासिभ्यामेवान्वयेनतयोरङ्गकार्यांतरविधाना
१० यानाश्रयणात्॥तदंतविधिर्दुर्वार अतआह॥स्यतासीति॥यद्यत्र धातोरित्यस्यस्यतासिभ्यामेवान्वयेनलृलुटोः पंचम्यंतात्परत्वेना
ऽनाश्रयणात्॥तदंतविधिर्दुर्वारोत आह॥स्यतासीतिङ्ग्या बृभ्यइत्यादावविति॥ङ्ग्याबंशे तदंतविध्यनापत्तिरूपोदोषइत्यर्थः॥विशे
षणत्वाभावादितिशेषः॥उत्तमैकाभ्यामिति॥सुपिचेत्यस्यसुवंतइत्यर्थेतन्निर्देशासंगतिरितिभावः॥परेत्वेवंसति घरूपेत्यत्रापित्तदंत
विध्यभावदोषपत्तौउत्तरपदाधिकारेमस्यपग्रहणमित्युत्तरपरिभाषावैयर्थ्यंतस्मादयुक्तमेतदित्याहुः॥कुमारीब्राह्मणीरूपेति॥स्थि
तप्रदर्शनमेतत्॥अन्यथापुंवद्भावेनोक्तरूपस्यदुर्लभत्वात्॥उत्तरपदेति॥परेतुलेखग्रहणेनसप्तम्यंततयामस्ययग्रहणेनतदंत
ग्रहणं इत्येवज्ञाप्यते॥उत्तरपदाधिकारइतिविशेषणेप्रयोजनाभावात्॥तेनसुपिचेत्यादौनदोषः॥त्रेःकृत्तिउपसर्गस्यघञ्यीत्यादौ
तुसामर्थ्यात्तदंतविधिरित्याहुः॥२५॥२६॥२७॥इत्यत्रैवेति॥पुस्तकांतरेएतदग्रेइत्याशयइतिपाठस्तत्सिद्ध्यर्थेतदंतविधिह्यस्वी
कारइतिशेषः॥केचित्तुस्त्रीप्रत्ययेतदादिनियमोन।उपसर्जनेतुसोस्तिइत्यंशद्वयवतीपरिभाषा। तन्नोतरांशस्येदमवतरणमित्या रा॰
हुः॥पदात्परत्वाभावेनचेति॥पदादित्यस्यकुत्सनेचसुपीत्यतः प्रागनिवृत्तेरयुक्तमेतत्॥कृत्स्वरेणेति॥नन्वनंतरग्रहणस्यादोऽपूर्व १०
पदत्वेपिस्वरएथैत्वेउक्तपरिभाषाज्ञापकत्वासंभवेनतस्याएवाभावेकथमेतत्॥उद्धृतशब्दस्याकृत्तदंतत्वात् नचवनोरचेत्यादावि
वतदंतविधिह्यांगीकारादेतदुपपत्तिरितिवाच्यं॥एवमेवोपपत्तौउक्तपरिभाषावैयर्थ्यापतेः॥गतिकारके तरपूर्वस्यापिस्वरए

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com